"वासःपरिधानानन्तरम् उद्वयमित्यनेन मन्त्रेणोन्नेत्रोन्नीता जलमध्यात् वहिर्निष्क्रामिताः सन्तऋत्विजः सयजमानाः आमहीयामित्येवंसंज्ञकाम् अपामेत्येतामृचं जपन्तः सर्वे देवयजनं प्रति गच्छन्ति" कर्कः ।

**आमहीयव** न० अमहीयुना ऋषिभेदेन दृष्टं साम अण् । सामभेदे तस्ययत्वपाठता तत् सा०सं०भा० दर्शितम् यथा "तृतीयसवने सप्त सूक्तानि तेषु नव सामानि गेयानि तत्र प्रथमे सूक्ते गायत्रसामहीयवं चेति द्वे सामनी" आमहीयवञ्च साम ऊहगाने ऊहगानारम्भे प्रथमं साम ।

**आमाति(ती)सार** पु० आमकृतोऽति(ती)सारः । आमकृते षष्ठे अतिसाररोगभेदे अतिसारशब्दे तस्य विवृतिः । अस्य निदानादि उक्तं सुश्रुते यथा । "अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तः कोष्ठं दोषा धातुसंघान् मलांश्च । नानावर्णान्नैकशः सारयन्ति शूलोपेतं षष्ठमेनं वदन्ति" आमातिसारे नो कार्य्यमादौ संग्रहणं नृणाम्" सुश्रु० ।

**आमात्य** पु० अमात्यएव स्वार्थे अण् । अमात्ये ।

**आमानस्य** न० अप्रशस्तं मानसमस्य अमानसः तस्य भावः ष्यञ् । दुःखे शब्दरत्ना० ।

**आमावास्य** त्रि० अमावास्यायां भवः सन्धिवेलादि० अण् । अमावास्याभवे "आमावास्येन हविषेष्ट्वा पौर्णमासेन वा" श०ब्रा० । वा वुन् अमावास्यक इत्यपि तत्रैव त्रि० ।

**आमाशय** पु० आमस्यापक्वान्नस्याशयः । देहमध्यस्थे नाभेरूर्द्ध्वस्थाने भुक्तापक्वान्नादिस्थाने । आशयाहि देहस्थाः सप्त सुश्रुते दर्शिता यथा "आशयस्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयः मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति आमाशयस्थानएव दोषरूप श्लेष्मस्थानं यथोक्तं सुश्रु०।"दोषस्थानान्यत ऊर्द्ध्वं वक्ष्यामः तत्र समासेन वातःश्रोणिगुदसंश्रयः । श्रोणिगुदयोरुपर्य्यानाभि पक्वाशयः पक्वाशयमध्यं पित्तस्य । आमाशयः श्लेष्मणः । तच्च स्थानं निर्णीतं भावप्र० यथा "अग्निवेगवहः प्राणोगुदान्ते प्रतिहन्यते । स ऊर्द्ध्वमागम्य पुनः समुत्क्षिपति पावकम् । पक्वाशयस्त्वधोनाभ्यामूर्द्ध्वमामाशयः स्थितः । नाभिमध्ये शरीरस्य प्राणाः नित्यं प्रतिष्ठिताः" चरके तु "नाभिस्थानोत्तरं जन्तोराहुरामाशयं बुधाः" इति अत्र विशेषमाह "उरोरक्ताशयस्तस्मादधःश्लेष्माशयः स्मृतः। आमाशयस्तु तदधस्तदधोऽग्न्याशयोमतः" इति अपक्वाशय प्रसङ्गात् आहारपाकप्रकारस्तावदुच्यते भावप्रकाशे सुश्रुतः "यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् सोऽन्तःप्रवेश्य गच्छेत्तं प्राणस्याथावलम्बते" इति तमाहारमामाशयस्थः क्लेदननामा कफः क्लेदयति क्लेदनात् संहतिं भिनत्ति च उक्तं च सुश्रुते "स आहारःषड्रसोऽप्यामाशये माधुर्य्यं लभते आमाशयस्थस्य मधुरस्य कफस्य योगात् उक्तं च श्लेष्मस्वरूपं "श्लेष्मा श्वेतो-गुरुःस्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वादुर्विदग्धोलवणो भवेत् । फेनभावं च लभते जठरानलतेजसा" । अत आह वाग्भटः "संधुक्षितः समानेन पचत्यामाशयस्थितम् । औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलमिति" प्राणवायुना प्रेरितस्ततः किञ्चिज्ज्वलितः पाचकाख्यपित्तोष्मणेषत्पक्वो भवति उक्तं च "अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेदिति" पाचकपित्तेन पाचकपित्तस्योष्मणा ततः एवाहारोनाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितोग्रहणीं प्रति याति उक्तं च ।"ततःसमानमरुता ग्रहणीमभिधावति"। ग्रहणीलक्षणमाह "षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते" पित्तधरा पाचकाख्यं पित्तं यदग्न्यधिष्ठानं तद्धारयति तत्र ग्रहण्यामामाशयपक्वाशय मध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च भवति तथा च "ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः आहारोग्रहण्यां कोष्ठवह्निना ग्रहणीस्थितपाचकपित्तस्थेन च वह्निना पच्यते पच्यमानः स ग्रहणीस्थितस्य कटुरसस्य पित्तयोगात्कटुर्भवति एतदाहारपाके विशेषमाह शरीरं पाञ्चभौतिकं तत्र पञ्चसु भूतेषु पञ्चाग्नयस्तिष्ठन्ति उक्तं च चरके "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः । सनाभसाः पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यतः" । अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनोत्तेजितेन शरीरवर्त्तिभूभागः पच्यते पक्वोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते तथा च सुश्रुते "पञ्चभूतात्मको देह आहारः पाञ्चभौतिकः । विपक्वं पञ्चधा सम्यग्गुणान्स्वानभिवर्द्धयेदिति" गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदिति एवमहोरात्रेण पक्व आहारोमिष्टः कटुश्च मधुरो भवति अम्लोऽम्लो भवति कटुतिक्तःकषायश्च कटुर्भवति उक्तं च "मिष्टः कटुश्च मधुरोऽथाम्लोऽम्लः पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वस्याहारस्य सारो रसशेषोग्रहणीस्थो मल इव